| अथोपपातकानि । | प्रायश्चित्तानि । | तदशक्तौ धेनुदानम् । | तदशक्तौ चूर्णीदानम् । | दक्षिणा । |
|---|---|---|---|---|
| लशुनपलाण्डुगृञ्जनभक्षणम् । कपरसादिभिर्लशुनादितुल्यद्रव्यभक्षणञ्च । | ज्ञानतश्चान्द्रायणम् । | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः । | २२॥० कार्षापणाः । | यथाशक्ति । |
| | अज्ञानात्तप्तकृच्छ्रम् । | पादोनधेनुचतुष्टयासम्भवात् ४ धेनवः । | ११।० कार्षापणाः । | यथाशक्ति । |
| | चिरतराभ्यासे संवत्सरयावकपानम् । एतदुभयत्र पुनरुपनयनमपि शूद्राणामुपनयनतुल्यचान्द्रायणेन सह प्रकृतव्रतस्य पादः । | १५ धेनवः । | ४५ कार्षापणाः । | यथाशक्ति । |
| सजातीयम्लेच्छसूतकिनां पक्वान्नभक्षणम् । | ज्ञानतः प्राजापत्यम् । | १ धेनुः । | ३ कार्षापणाः । | यथाशक्ति । |
| | अज्ञानात् त्र्यहोपवासः । | ० | १॥० कार्षापणः । | यथाशक्ति । |
| | अभ्यासे द्वैगुण्यादिकम् । | | | |
| म्लेच्छसूतकिनां ब्राह्मणक्षत्रियवैश्यशूद्राणामामान्नस्य ब्राह्मणकर्तृकभक्षणम् । | विप्रस्यामान्ने प्राणायामः । क्षत्रियस्यामान्ने शतगायत्रीजपः । वैश्यस्यामान्ने पञ्चशतगायत्रीजपः । शूद्रस्यामान्ने अष्टसहस्रगायत्रीजपः । अभ्यासे द्वैगुण्यम् । | | | |
| म्लेच्छसूतकिजलपानम् । | ब्राह्मणस्य पञ्चगव्यं पीत्वा उपवासः । एतत् सकृदज्ञाने ज्ञाने तु द्वैगुण्यम् । अभ्यासे त्वावृत्तिः । तज्जलस्पर्शे स्नानमात्रम् । क्षत्रियादीनां पादपादहानिः । | ० | ॥० पणाः । | यथाशक्ति । |
| नवश्राद्धान्नभोजनम् । नवश्राद्धन्तु साग्नीनां चतुर्थपञ्चमनवमैकादशाहक्रियमाणं निरग्नीनान्तु आद्यश्राद्धमात्रम् । | चान्द्रायणम् । | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः । | २२॥० कार्षापणाः । | यथाशक्ति । |
| प्रथममासिकश्राद्धान्नभोजनम् । | पराकः । | ५ धेनवः । | १५ कार्षापणाः । | यथाशक्ति । |
| त्रिपक्षे प्रेतश्राद्धान्नभोजनम् । | अतिकृच्छ्रम् । | ३ धेनवः । | ९ कार्षापणाः । | यथाशक्ति । |
| द्विमासादिषण्मासपर्यन्तं प्रेतश्राद्धान्नभोजनम् । | प्राजापत्यम् । | १ धेनुः । | ३ कार्षापणाः । | यथाशक्ति । |
| षण्मासादूर्द्ध्वमब्दपर्यन्तं प्रेतश्राद्धान्नभोजनम् । | पादकृच्छ्रम् । | ० | १ कार्षापणः । | यथाशक्ति । |
| पुनराब्दिकश्राद्धान्नभोजनं अर्थात् सपिण्डीकरणान्नभोजनम् । एतत् स्मार्तमतं शूलपाणिमते तु द्वितीयसांवत्सरिकान्नभोजनम् । | एकाहोपवासः । | ० | ॥० पणाः । | यथाशक्ति । |
| पञ्चाद्यनन्तरितहस्तदत्तानां एकहस्तदत्तानां शूद्रादत्तानाञ्च घृततैललवणव्यञ्जनपानीयपायसमाक्षिकफाणितगोरसशाकानां भक्षणम् । | द्व्यहसाध्यसान्तपनम् । एतत् ज्ञानतः । अज्ञानादर्द्धम् । लौहपात्रेण परिवेषणेऽप्येतदेव प्रायश्चित्तं ज्ञेयम् । एतद् ब्राह्मणस्य । क्षत्रियादीनां पादपादहानिः । | ० | १ कार्षापणः । | यथाशक्ति । |
| अकृतापोशानस्य अकृतमौनस्य च भोजनम् । | अष्टोत्तरशतगायत्रीजपः एतद्द्विजानामनापद्विषयम् । | ० | ० | ० |
| अकृताचमनस्य पानभोजनम् । | अष्टोत्तरसहस्रगायत्रीजपः उपवासो वा । अभ्यासे द्विगुणादि । एतत् कटुकषायताम्बूलेक्ष्वतिरिक्तभोजनविषयम् । | | ॥० पणाः । | यथाशक्ति । |